# Jadavpur University

## M.A. Admission Test in Sanskrit, 2022

**Time: 2 Hours** **Full Marks: 50**

**अधोलिखितानां प्रश्नानां प्रदत्तेषु विकल्पेषु समीचीनमुत्तरं (✓) चिह्नेन प्रदर्शनीयम् ।**

**क-वर्गः** **१×९ = ९**

१. 'चित्तश्रवस्तमः' इत्यत्र कः समासः ?

तत्पुरुषः / बहुव्रीहिः / द्विगुः / अव्ययीभावः

२. 'सूपायनः' इति शब्दे कः धातुः ?

सु-धातुः / आप्-धातुः / इ-धातुः / पा-धातुः

३. अक्षसूक्तस्य देवता निर्णेया –

अक्षाः / कितवः / कितवः अक्षाश्च / कितवः अक्षाः कृषिदेवता च

४. हिरण्यगर्भसूक्तस्य का देवता ?

हिरण्यगर्भः / परमात्मा / प्रजापतिः / नारायणः

५. 'क्रन्दसी' इत्यस्य अर्थः कः ?

अश्विनौ / मित्रावरुणौ / द्यावापृथिव्यौ / अग्नीषोमौ

६. 'महिना' इत्यस्य लौकिकं रूपं किम् ?

महिमा / महिम्ना / महित्वा / महिम्नाम्

७. 'तं ब्रह्माणं तमृषिं तं सुमेधाम्' इति मन्त्रपादः कस्मिन् सूक्ते लभ्यते ?

देवीसूक्ते / हिरण्यगर्भसूक्ते / अग्निसूक्ते / अक्षसूक्ते

८. स्वरप्रक्रियानुसारेण अग्निशब्दः कीदृशः ?

आद्युदात्तः / अन्तोदात्तः / द्विरुदात्तः / सर्वानुदात्तः

९. कति अक्षाः आस्फारे विहरन्ति ?

ऊनपञ्चाशत् / द्विपञ्चाशत् / त्रिपञ्चाशत् / पञ्चपञ्चाशत्

## ख-वर्गः १×९ = ९

१. शकुन्तलायाः लताभगिनी किंनामधेया ?

अनसूया / प्रियंवदा / वनजोत्स्ना / हंसपदिका

२. महर्षेः कण्वस्याश्रमस्य सन्निकर्षे का नदी आसीत् ?

मालिनी / सरयूः / यमुना / गङ्गा

३. 'न मे दूरे किञ्चिन्न क्षणमपि पार्श्वे' – कस्मात् ?

मृगजवात् / रथजवात् / हयजवात् / सायकजवात्

४. विश्वनाथमतेन शाकुन्तले इयं प्रस्तावना दृश्यते ?

अवलगितम् / प्रवर्तकम् / कथोद्घातः / प्रयोगातिशयः

५. अर्थप्रकृतिषु अस्ति –

पताका / पताकास्थानम् / प्रस्तावना / प्रतिमुखम्

६. कथांशानां व्यवच्छेदः साहित्यदर्पणे केन नाम्ना उच्यते ?

उच्छ्वासः / सर्गः / आश्वासः / परिच्छेदः

७. हेम्नः विशुद्धिः श्यामिकापि वा संलक्ष्यते –

सलिले / वायौ / तेजसि / अग्नौ

८. दिलीप इति राजेन्दुरिन्दुः –

जलनिधाविव / पयोनिधाविव / क्षीरनिधाविव / तैलनिधाविव

९. सुयोधनः दुरोदरच्छद्मजितां जगतो केनोपायेन जेतुं समीहते ?

बलेन / पौरुषेन / नयेन / वाक्येन

## ग-वर्गः १×९ = ९

१. प्रत्यक्षज्ञानस्य करणं किम् ?

प्रत्यक्षम् / अनुमानम् / उपमानम् / शब्दः

२. सव्यभिचारस्य अपरं नाम किम् ?

ऐकान्तिकः / अनैकान्तिकः / व्यभिचारयुक्तः / साहचर्यवान्

३. गगने रूपाभावो वर्तते –

संयोगसम्बन्धे / समवायसम्बन्धे / स्वरूपसम्बन्धे / तादात्म्यसम्बन्धे

४. न्यायमते परिमाणं कतिविधम् ?

द्विविधम् / त्रिविधम् / चतुर्विधम् / पञ्चविधम्

५. शब्दत्वप्रत्यक्षे कः सन्निकर्षः अपेक्षितः ?

संयुक्तसमवायः / संयुक्तसमवेतसमवायः / समवायः / समवेतसमवायः

६. द्रव्यगुणकर्मसामान्यविशेषसमवायाऽभावाः सप्त पदार्थाः – विभागादेव सप्तत्वे लब्धे पुनः सप्तग्रहणं –

न्यूनसंख्याव्यवच्छेदार्थम् / अधिकसंख्याव्यवच्छेदार्थम् / स्पष्टार्थम् / इतरव्यवच्छेदार्थम्

७. 'संभूतिः' इत्यस्य कोऽर्थः कृतः शङ्कराचार्येण ?

प्रकृतिः / हिरण्यगर्भः / ईश्वरः / ब्रह्म

८. अमृतमिति पदं कतिवारं श्रूयते ईशोपनिषदि ?

द्विः / त्रिः / चतुः / पञ्चकृत्वः

९. के जनाः तमसावृतान् लोकान् प्रेत्याभिगच्छन्ति ?

हत्याकारिणः / आत्महनः / हिंसकाः / अन्धाः

**घ-वर्गः** $१\times९ = ९$

१. अपायार्थे ध्रुवस्य का संज्ञा भवति ?

कर्मसंज्ञा / करणसंज्ञा / अपादानसंज्ञा / सम्प्रदानसंज्ञा

२. 'चर्मणि द्वीपिनं हन्ति' इत्यत्र 'चर्मणि' इति पदे सप्तमीविधायकम् अनुशासनमस्ति –

सप्तम्यधिकरणे च / साध्वसाधुप्रयोगे च / निमित्तात्कर्मयोगे / यस्य च भावेन भावलक्षणम्

३. 'जगतः कर्ता कृष्णः' इत्यत्र 'जगत्' इति शब्दे षष्ठीविधायकं सूत्रमस्ति –

षष्ठी शेषे / षष्ठी हेतुप्रयोगे / षष्ठ्यतसर्थप्रत्ययेन / कर्तृकर्मणोः कृतिः

४. अपवर्गे का विभक्तिर्युज्यते ?

प्रथमा / द्वितीया / तृतीया / चतुर्थी

५. 'वाताय कपिला विद्युत्' इत्यत्र 'वाताय' इति पदे केन अनुशासनेन चतुर्थी ?

तादर्थ्ये चतुर्थी वाच्या / क्लृपि सम्पद्यमाने च / उत्पातेन ज्ञापिते च / हितयोगे च

६. 'एकविभक्ति चापूर्वनिपाते' इति सूत्रेण किं विधीयते ?

पूर्वनिपातः / उपसर्जनम् / प्रातिपदिकस्य ह्रस्वः / परनिपातनिषेधः

७. 'बहुलम्' इति पदस्य कति अर्थाः वर्त्तन्ते ?

त्रयः / चत्वारः / पञ्च / षट्

८. वृत्तिः कतिधा विभज्यते ?

चतुर्धा / सप्तधा / पञ्चधा / नवधा

९. 'पञ्चगङ्गम्' इत्यत्र समासविधायकं सूत्रं किम् ?

संख्यापूर्वो द्विगुः / नदीभिश्च / चार्थे द्वन्द्वः / अनेकमन्यपदार्थे

### ङ-वर्गः १×५=५

१. मनुसंहितायां येषां देवानां सारभूतांशेन राजा सृष्टः, तेषां देवानां मध्ये अस्य नामोल्लेखो दृश्यते –

ब्रह्मणः / वित्तेशस्य / विष्णोः / महादेवस्य

२. न्यायवृत्तस्य नृपतेः यशः लोके अम्भसि विस्तीर्यते –

घृत-/ तैल- / मधु- / जल-बिन्दुरिव

३. मनूक्तदुर्गाणां मध्ये अस्य दुर्गस्य प्रकारः कौटिलीये अर्थशास्त्रे न दृश्यते –

नृदुर्गस्य / धन्वदुर्गस्य / गिरिदुर्गस्य / वार्क्षदुर्गस्य

४. विद्वद्भिर्ब्राह्मणैः सह नृपः व्यवहारान् पश्येत् –

धर्मशास्त्रानुसारेण / अर्थशास्त्रानुसारेण / धर्म-अर्थ-नीतिशास्त्रानुसारेण / कामशास्त्रानुसारेण

५. सर्वेष्वर्थविवादेषु बलवती –

पूर्वा क्रिया / उत्तरा क्रिया / मध्यमा क्रिया / मिथक्रिया

## च-वर्गः

$\frac{1}{2} \times 8 = 4$

१. चतुर्विंशतिसर्गात्मकं *राजप्रशस्तिकाव्यम्* इति प्रसिद्धमभिलिखितं काव्यं कस्मिन् राज्ये उपलब्धम् ?

मध्यप्रदेशे / राजस्थाने / उत्तरप्रदेशे / केरले

२. विजयसेनराजस्य देवपाडाप्रशस्तिः कस्मिन् उपादाने उत्कीर्णा ?

प्रस्तरे / पित्तले / ताम्रे / लौहे

३. कोन्नोग्राम् – प्रकरणे कलत्रशब्देन कस्याः संख्याया बोधो भवति ?

४ / ३ / ६ / ७

४. 'कलारसरसाप्रमाणे विक्रमाब्दे' – इत्युक्ते कः विक्रमाब्दो लभ्यते ?

१६५१ / ११५६ / १५१६ / १६१५

५. अशोकराजस्य प्रथममुख्यशिलानुशासनस्य प्रचारकाले देवानां प्रियस्य प्रियदर्शिनो राज्ञो महानसे कति मृगाः प्रत्यहं हन्यन्ते स्म ?

पञ्च / एकः / द्वौ / षट्

६. प्रथमरुद्रदाम्नो जुनागढप्रशस्त्यनुसारं सुदर्शनसेतुः कस्मिन् वर्षे झञ्झया विध्वस्तः ?

७२ / १७२ / ७५ / २५

७. स्वामिचष्टनस्य पुत्र आसीत् –

जयदामा / प्रथमरुद्रदामा / घ्समतिकः / प्रथमरुद्रसिंहः

८. मेहरौलिलौहस्तम्भाभिलेखानुसारं चन्द्रराजस्य वीर्यानलैः अयं जलनिधिः अद्याप्यधिवास्यते –

उत्तरः / दक्षिणः / पूर्वः / अपरः

## छ-वर्गः

१×५ = ५

१. आयुर्वेदस्य कौमारभृत्यतन्त्रे को विषय आलोचितः ?

पिशाचविद्या / विषविद्या / वार्धक्यविद्या / धात्रीविद्या

२. अयं भवति पिङ्गलाचार्यकृतस्य छन्दःसूत्रस्य टीकाकारः –

क्षेमेन्द्रः / केदारभट्टः / यादवप्रकाशः / जयदेवः

३. भास्करभट्टविरचितोऽयं ग्रन्थः –

शरीरपद्मिनी / रुग्विनिश्चयः / चिकित्सासंग्रहः / अष्टाङ्गहृदयः

४. समराङ्गणसूत्रधार-ग्रन्थस्य प्रणेता –

माधवः / गोविन्दाचार्यः / भोजः / गोपालकृष्णः

५. कार्तिकेयो भवति अस्य शास्त्रस्य प्रवक्ता –

अश्वशास्त्रस्य / गजशास्त्रस्य / चौर्यशास्त्रस्य / पक्षिशास्त्रस्य